# Jayaditya Ashtakam

## Eight verses to the Sun as Jayaditya, from the Skanda Purana

स्कन्द पुराण से सूर्य देव की स्तुति

A hymn of the young sage Kamatha to the Sun as Jayaditya, from the *Skanda Purana*. The full text comes first for unbroken recitation, then each verse with its meaning in English and Hindi.

## The full text सम्पूर्ण पाठ

Verse numbers follow the printed edition (*Skanda Purana* 1.2.51.65 to 90), which prints the eight stanzas of the ashtakam as nine numbered verses.

### जयादित्यस्तोत्रम् अथवा जयादित्याष्टकम्

कमठ उवाच

न त्वं कृतः केवलसंश्रुतश्च यजुष्येवं व्याहरत्यादिदेव! ।
चतुर्विधा भारती दूरदूरं धृष्टः स्तौमि स्वार्थकामः क्षमैतत् ॥ १ ॥

मार्तण्डसूर्यांशुरविस्तथेन्द्रो भानुर्भगश्चाऽर्यमा स्वर्णरेताः ॥ २ ॥

दिवाकरो मित्रविष्णुश्च देव! ख्यातस्त्वं वै द्वादशात्मा नमस्ते ।
लोकत्रयं वै तव गर्भगेहं जलाधारः प्रोच्यसे खं समग्रम् ॥ ३ ॥

नक्षत्रमाला कुसुमाभिमाला तस्मै नमो व्योमलिङ्गाय तुभ्यम् ॥ ४ ॥

त्वं देवदेवस्त्वमनाथनाथस्त्वं प्राप्यपालः कृपणे कृपालुः ।
त्वं नेत्रनेत्रं जनबुद्धिबुद्धिराकाशकाशो जय जीवजीवः ॥ ५ ॥

दारिद्र्यदारिद्र्य निधे निधीनाममङ्गलामङ्गल शर्मशर्म ।
रोगप्ररोगः प्रथितः पृथिव्यां चिरं जयाऽऽदित्य! जयाऽऽप्रमेय! ॥ ६ ॥

व्याधिग्रस्तं कुष्ठरोगाभिभूतं भग्नघ्राणं शीर्णदेहं विसंज्ञम् ।
माता पिता बान्धवाः सन्त्यजन्ति सर्वैस्त्यक्तं पासि कोऽस्ति त्वदन्यः ॥ ७ ॥

त्वं मे पिता त्वं जननी त्वमेव त्वं मे गुरुर्बान्धवाश्च त्वमेव।
त्वं मे धर्मस्त्वञ्च मे मोक्षमार्गो दासस्तुभ्यं त्यज वा रक्ष देव! ॥ ८ ॥

पापोऽस्मि मूढोऽस्मि महोग्रकर्मा रौद्रोऽस्मि नाऽऽचारनिधानमस्मि।
तथापि तुभ्यं प्रणिपत्य पादयोर्जयं भक्तानामर्पयं श्रीजयार्क! ॥ ९ ॥

## फलश्रुतिः

### नारद उवाच

एवं स्तुतो जयादित्यः कमठेन महात्मना।
स्निग्धगम्भीरयावाचा प्राह तं प्रहसन्निव ॥ १० ॥

जयादित्याष्टकमिदं यत्त्वया परिकीर्तितम्।
अनेनस्तोष्यते यो माम्भुवि तस्य न दुर्लभम् ॥ ११ ॥

रविवारे विशेषेण मां समभ्यर्च्य यः पठेत्।
तस्य रोगानशिष्यन्ति दारिद्र्यञ्च न संशयः ॥ १२ ॥

त्वया च तोषितोवत्सतवदद्मिवरन्त्वमुम्।
सर्वज्ञो भुवि भूत्वा त्वं ततो मुक्तिमवाप्स्यसि ॥ १३ ॥

त्वत्पिता स्मृतिकारश्च भविष्यति द्विजार्चितः।
स्थानस्याऽस्य न नाशश्च कदाचित्प्रभविष्यति ॥ १४ ॥

न चैतत्स्थानकं वत्स परित्यक्ष्यामि कर्हिचित्।
एवमुक्त्वा स भगवान्ब्राह्मणैरर्चितः स्तुतः ॥ १५ ॥

अनुज्ञाप्य द्विजेन्द्रांस्तांस्तत्रैवाऽन्तर्दधे प्रभुः।
एवं पार्थ समुत्पन्नो जयादित्योऽत्र भूतले ॥ १६ ॥

आश्विने मासि सम्प्राप्ते रविवारे च सुव्रत!।
आश्विने भानुवारेण यो जयादित्यमर्चयेत् ॥ १७ ॥

कोटितीर्थे नरः स्नात्वा ब्रह्महत्यां व्यपोहति।
पूजनाद्रक्तमाल्यैश्च रक्तचन्दनकुङ्कुमैः ॥ १८ ॥

लेपनाद्गन्धधूपाद्यैर्नैवेद्यैर्घृतपायसैः।
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥ १९ ॥

मुच्यते सर्वपापेभ्यः सूर्यलोकञ्च गच्छति।
पुत्रदारधनान्यायुः प्राप्य सांसारिकं सुखम् ॥ २० ॥

इष्टकामैः समायुक्तः सूर्यलोके चिरं वसेत् ॥ २१ ॥

सर्वेषु रविवारेषु जयादित्यस्य दर्शनम् ।
कीर्तनं स्मरणं वापि सर्वरोगोपशान्तिकम् ॥ २२ ॥

अनादिनिधनं देवमव्यक्तं तेजसान्निधिम् ।
ये भक्तास्ते च लीयन्ते सौरस्थाने निरामये ॥ २३ ॥

सूर्योपरागे सम्प्राप्ते रविकूपे समाहितः ।
स्नानं यः कुरुते पार्थ होमं कुर्यात्प्रयत्नतः ॥ २४ ॥

दानं चैव यथाशक्त्या जयादित्याग्रतःस्थितः ।
तस्य पुण्यस्य माहात्म्यं शृणुष्वैकमनाजय ॥ २५ ॥

कुरुक्षेत्रेषु यत्पुण्यं प्रभासे पुष्करेषु च ।
वाराणस्याञ्च यत्पुण्यं प्रयागे नैमिषेऽपि वा ।
तत्पुण्यं लभते मर्त्यो जयादित्यप्रसादतः ॥ २६ ॥

॥ इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां
प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे
जयादित्यमाहात्म्यवर्णननामैकपञ्चाशत्तमोऽध्याये
जयादित्याष्टकम् ॥

## The full text in Roman letters रोमन लिपि में पाठ

With diacritics, as a guide to pronunciation.

kamaṭha uvāca

*na tvaṁ kṛtaḥ kevalasaṁśrutaśca yajuṣyevaṁ vyāharatyādideva! |*
*caturvidhā bhāratī dūradūraṁ dhṛṣṭaḥ staumi svārthakāmaḥ kṣamaitat || 1 ||*

*mārtaṇḍasūryāṁśuravistathendro bhānurbhagaścā'ryamā svarṇaretāḥ || 2 ||*

*divākaro mitraviṣṇuśca deva! khyātastvaṁ vai dvādaśātmā namaste |*
*lokatrayaṁ vai tava garbhagehaṁ jalādhāraḥ procyase khaṁ samagram || 3 ||*

*nakṣatramālā kusumābhimālā tasmai namo vyomaliṅgāya tubhyam || 4 ||*

*tvaṁ devadevastvamanāthanāthastvaṁ prāpyapālaḥ kṛpaṇe kṛpāluḥ |*
*tvaṁ netranetraṁ janabuddhibuddhirākāśakāśo jaya jīvajīvaḥ || 5 ||*

*dāridryadāridrya nidhe nidhīnāmamaṅgalāmaṅgala śarmaśarma |*
*rogaprarogaḥ prathitaḥ pṛthivyāṁ ciraṁ jayā'ditya! jayā'prameya! || 6 ||*

*vyādhigrastaṁ kuṣṭharogābhibhūtaṁ bhagnaghrāṇaṁ śīrṇadehaṁ visaṁjñam |*
*mātā pitā bāndhavāḥ santyajanti sarvaistyaktaṁ pāsi ko'sti tvadanyaḥ || 7 ||*

*tvaṁ me pitā tvaṁ jananī tvameva tvaṁ me gururbāndhavāśca tvameva |*
*tvaṁ me dharmastvañca me mokṣamārgo dāsastubhyaṁ tyaja vā rakṣa deva! || 8 ||*

*pāpo'smi mūḍho'smi mahograkarmā raudro'smi nā'cāranidhānamasmi |*
*tathāpi tubhyaṁ praṇipatya pādayorjayaṁ bhaktānāmarpayaṁ śrījayārka! || 9 ||*

## phalaśrutiḥ

### nārada uvāca

*evaṁ stuto jayādityaḥ kamaṭhena mahātmanā |*
*snigdhagambhīrayāvācā prāha taṁ prahasanniva || 10 ||*

*jayādityāṣṭakamidaṁ yattvayā parikīrtitam |*
*anenastoṣyate yo māmbhuvi tasya na durlabham || 11 ||*

*ravivāre viśeṣeṇa māṁ samabhyarcya yaḥ paṭhet |*
*tasya rogānaśiṣyanti dāridryañca na saṁśayaḥ || 12 ||*

*tvayā ca toṣitovatsatavadadmivarantvamum |*
*sarvajño bhuvi bhūtvā tvaṁ tato muktimavāpsyasi || 13 ||*

*tvatpitā smṛtikāraśca bhaviṣyati dvijārcitaḥ |*
*sthānasyā'sya na nāśaśca kadācitprabhaviṣyati || 14 ||*

*na caitatsthānakaṁ vatsa parityakṣyāmi karhicit |*
*evamuktvā sa bhagavānbrāhmaṇairarcitaḥ stutaḥ || 15 ||*

*anujñāpya dvijendrāṁstāṁstatraivā'ntardadhe prabhuḥ |*
*evaṁ pārtha samutpanno jayādityo'tra bhūtale || 16 ||*

*āśvine māsi samprāpte ravivāre ca suvrata! |*
*āśvine bhānuvāreṇa yo jayādityamarcayet || 17 ||*

*koṭitīrthe naraḥ snātvā brahmahatyāṁ vyapohati |*
*pūjanādraktamālyaiśca raktacandanakuṅkumaiḥ || 18 ||*

*lepanādgandhadhūpādyairnaivedyairghṛtapāyasaiḥ |*
*brahmaghnaśca surāpaśca steyī ca gurutalpagaḥ || 19 ||*

*mucyate sarvapāpebhyaḥ sūryalokañca gacchati |*
*putradāradhanānyāyuḥ prāpya sāṁsārikaṁ sukham || 20 ||*

*iṣṭakāmaiḥ samāyuktaḥ sūryaloke ciraṁ vaset || 21 ||*

*sarveṣu ravivāreṣu jayādityasya darśanam |*
*kīrtanaṁ smaraṇaṁ vāpi sarvarogopaśāntikam || 22 ||*

*anādinidhanaṁ devamavyaktaṁ tejasānnidhim |*
*ye bhaktāste ca līyante saurasthāne nirāmaye || 23 ||*

*sūryoparāge samprāpte ravikūpe samāhitaḥ |*
*snānaṁ yaḥ kurute pārtha homaṁ kuryātprayatnataḥ || 24 ||*

*dānaṁ caiva yathāśaktyā jayādityāgrataḥsthitaḥ |*
*tasya puṇyasya māhātmyaṁ śṛṇuṣvaikamanājaya || 25 ||*

*kurukṣetreṣu yatpuṇyaṁ prabhāse puṣkareṣu ca |*
*vārāṇasyāñca yatpuṇyaṁ prayāge naimiṣe'pi vā |*
*tatpuṇyaṁ labhate martyo jayādityaprasādataḥ || 26 ||*

*|| iti śrīskānde mahāpurāṇe ekāśītisāhasryāṁ saṁhitāyāṁ prathame māheśvarakhaṇḍe kaumārikākhaṇḍe jayādityamāhātmyavarṇananāmaikapañcāśattamo'dhyāye jayādityāṣṭakam ||*

## About this text परिचय

Jayaditya, “the victorious Sun”, is the Sun as he was worshipped at a shrine near Koti Tirtha. The *Skanda Purana* tells the story in its Kaumarika Khanda, where the sage Narada recounts it to Arjuna. The young sage Kamatha praised the Sun with these eight verses; pleased, the Sun promised that he would never leave that place, and blessed Kamatha.

The hymn moves from praise to surrender. It names the Sun as the twelve Adityas, as the eye of every eye and the life of every life, and as the one who protects the sick person whom even family has abandoned. It ends with the famous line “you are my father, you my mother”, and a plea for victory for all devotees.

The verses that follow (10 to 26) are the Sun’s reply and Narada’s account of the shrine’s worship. They name Sunday, and especially a Sunday in the month of Ashvina, as the time for it.

जयादित्य, अर्थात् “विजयी सूर्य”, सूर्य देव का वह रूप हैं जिनकी पूजा कोटितीर्थ के पास एक मंदिर में होती थी। *स्कन्द पुराण* के कौमारिका खण्ड में देवर्षि नारद यह कथा अर्जुन को सुनाते हैं। युवा ऋषि कमठ ने इन आठ श्लोकों से सूर्य की स्तुति की; प्रसन्न होकर सूर्य ने वचन दिया कि वे उस स्थान को कभी नहीं छोड़ेंगे, और कमठ को आशीर्वाद दिया।

यह स्तोत्र स्तुति से शरणागति तक जाता है। यह सूर्य को बारह आदित्यों के रूप में, हर नेत्र के नेत्र और हर जीवन के जीवन के रूप में, और उस रोगी के रक्षक के रूप में पुकारता है जिसे परिवार भी छोड़ चुका हो। इसका अंत प्रसिद्ध पंक्ति “त्वं मे पिता त्वं जननी” और सभी भक्तों की विजय की प्रार्थना से होता है।

आगे के श्लोक (10 से 26) सूर्य का उत्तर और उस मंदिर की पूजा के विषय में नारद का वर्णन हैं। इनमें रविवार, और विशेषकर आश्विन मास के रविवार, को पूजा का समय बताया गया है।

| | | |
|---|---|---|
| **Deity**<br>देवता | Surya, as Jayaditya | सूर्य, जयादित्य रूप में |
| **Composed by**<br>रचयिता | The young sage Kamatha, son of the sage Harita (*Skanda Purana* 1.2.51.25) | युवा ऋषि कमठ, हारीत ऋषि के पुत्र (*स्कन्द पुराण* 1.2.51.25) |
| **Narrated by**<br>वक्ता | Narada, to Arjuna | नारद, अर्जुन से |
| **Where it is found**<br>स्रोत | *Skanda Purana*, Maheshvara Khanda, Kaumarika Khanda, chapter 51 | *स्कन्द पुराण*, माहेश्वर खण्ड, कौमारिका खण्ड, अध्याय 51 |
| **Metre**<br>छन्द | Eleven-syllable (trishtubh family) metres in verses 1 to 9; anushtubh in verses 10 to 26 | श्लोक 1 से 9 में ग्यारह अक्षरों वाले (त्रिष्टुप् वर्ग के) छन्द; श्लोक 10 से 26 में अनुष्टुप् |
| **Day named**<br>दिन | Sunday; above all, a Sunday in Ashvina | रविवार; विशेषकर आश्विन मास का रविवार |

## How it is recited पाठ की विधि

The Sun himself names the time in verse 12: Sunday, after worship. Many recite the

श्लोक 12 में स्वयं सूर्य समय बताते हैं: रविवार, पूजा के बाद। अनेक लोग सूर्योदय के समय, पूर्व की ओर मुख करके, सूर्य को जल अर्पित

ashtakam at sunrise, facing east, after offering water to the Sun. Verses 10 to 26 belong to the story of the shrine and may be read once for their meaning; verses 1 to 9, the ashtakam itself, are the ones repeated.

करने के बाद अष्टक का पाठ करते हैं। श्लोक 10 से 26 मंदिर की कथा के अंग हैं और अर्थ के लिए एक बार पढ़े जा सकते हैं; दोहराए जाने वाले श्लोक 1 से 9, अर्थात् स्वयं अष्टक, ही हैं।

ASTROSHALA

# Verse by verse, with meaning श्लोक, अर्थ सहित

Each verse again, with its pronunciation in Roman letters and its meaning in English and Hindi.

## कमठ उवाच

### न त्वं कृतः केवलसंश्रुतश्च यजुष्येवं व्याहरत्यादिदेव! ।
### चतुर्विधा भारती दूरदूरं धृष्टः स्तौमि स्वार्थकामः क्षमैतत् ॥ १ ॥

*na tvaṁ kṛtaḥ kevalasaṁśrutaśca yajuṣyevaṁ vyāharatyādideva! |*
*caturvidhā bhāratī dūradūraṁ dhṛṣṭaḥ staumi svārthakāmaḥ kṣamaitat || 1 ||*

**MEANING**

Kamatha said: You were not made, nor are you known by report alone; so the Yajurveda proclaims you, O First God. Speech in all its four forms falls far, far short of you. Bold, and seeking my own good, I praise you: forgive this.

**अर्थ**

कमठ बोले: आप किसी के द्वारा रचे नहीं गए, न ही केवल सुनी-सुनाई बात से जाने जाते हैं; हे आदिदेव, यजुर्वेद आपका ऐसा ही वर्णन करता है। चारों प्रकार की वाणी आपसे बहुत दूर रह जाती है। मैं धृष्टता से, अपने हित की कामना से आपकी स्तुति करता हूँ: इसे क्षमा करें।

---

### मार्तण्डसूर्यांशुरविस्तथेन्द्रो भानुर्भगश्चाऽर्यमा स्वर्णरेताः ॥ २ ॥

*mārtaṇḍasūryāṁśuravistathendro bhānurbhagaścā'ryamā svarṇaretāḥ || 2 ||*

**MEANING**

Martanda, Surya, Amshu, Ravi, and Indra; Bhanu, Bhaga, Aryaman, and Svarnaretas;

**अर्थ**

मार्तण्ड, सूर्य, अंशु, रवि और इन्द्र; भानु, भग, अर्यमा और स्वर्णरेता;

---

### दिवाकरो मित्रविष्णुश्च देव! ख्यातस्त्वं वै द्वादशात्मा नमस्ते ।
### लोकत्रयं वै तव गर्भगेहं जलाधारः प्रोच्यसे खं समग्रम् ॥ ३ ॥

*divākaro mitraviṣṇuśca deva! khyātastvaṁ vai dvādaśātmā namaste |*
*lokatrayaṁ vai tava garbhagehaṁ jalādhāraḥ procyase khaṁ samagram || 3 ||*

**MEANING**

Divakara, Mitra, and Vishnu: O God, you are renowned as the Self in twelve forms. Salutations to you. The three worlds are your inner chamber; you are called the support of the waters, and the whole sky.

**अर्थ**

दिवाकर, मित्र और विष्णु: हे देव, आप बारह रूपों वाले आत्मा (द्वादश आदित्य) के रूप में प्रसिद्ध हैं। आपको नमस्कार। तीनों लोक आपका गर्भगृह हैं; आपको जल का आधार और सम्पूर्ण आकाश कहा जाता है।

---

### नक्षत्रमाला कुसुमाभिमाला तस्मै नमो व्योमलिङ्गाय तुभ्यम् ॥ ४ ॥

*nakṣatramālā kusumābhimālā tasmai namo vyomaliṅgāya tubhyam || 4 ||*

**MEANING**

The garland of stars is your garland of flowers. Salutations to you, whose emblem is the sky itself.

**अर्थ**

नक्षत्रों की माला आपकी पुष्पमाला है। आकाश ही जिनका लिङ्ग (प्रतीक) है, ऐसे आपको नमस्कार।

---

त्वं देवदेवस्त्वमनाथनाथस्त्वं प्राप्यपालः कृपणे कृपालुः ।
त्वं नेत्रनेत्रं जनबुद्धिबुद्धिराकाशकाशो जय जीवजीवः ॥ ५ ॥

*tvaṁ devadevastvamanāthanāthastvaṁ prāpyapālaḥ kṛpaṇe kṛpāluḥ |*
*tvaṁ netranetraṁ janabuddhibuddhirākāśakāśo jaya jīvajīvaḥ || 5 ||*

**MEANING**

You are the god of gods, the protector of the unprotected, the guardian of those who reach you, kind to the helpless. You are the eye of the eye, the understanding behind all understanding, the light of the sky's light, the life of life: victory to you.

**अर्थ**

आप देवों के देव हैं, अनाथों के नाथ हैं, शरण में आए लोगों के रक्षक और दीनों पर कृपा करने वाले हैं। आप नेत्रों के नेत्र, बुद्धि की बुद्धि, आकाश के प्रकाश और जीवन के जीवन हैं: आपकी जय हो।

---

दारिद्र्यदारिद्र्य निधे निधीनाममङ्गलामङ्गल शर्मशर्म ।
रोगप्ररोगः प्रथितः पृथिव्यां चिरं जयाऽऽदित्य! जयाऽऽप्रमेय! ॥ ६ ॥

*dāridryadāridrya nidhe nidhīnāmamaṅgalāmaṅgala śarmaśarma |*
*rogaprarogaḥ prathitaḥ pṛthivyāṁ ciraṁ jayā'ditya! jayā'prameya! || 6 ||*

**MEANING**

You are poverty to poverty itself, treasure of treasures, misfortune to misfortune, joy of all joys; you are famed on earth as the one who drives out every disease. Long be your victory, O Aditya; victory, O Immeasurable One.

**अर्थ**

आप दरिद्रता के लिए भी दरिद्रता (उसका नाश करने वाले) हैं, निधियों की निधि, अमंगल के लिए अमंगल, और सुखों के सुख हैं; पृथ्वी पर आप हर रोग को दूर करने वाले के रूप में प्रसिद्ध हैं। हे आदित्य, आपकी सदा जय हो; हे अप्रमेय, आपकी जय हो।

---

व्याधिग्रस्तं कुष्ठरोगाभिभूतं भग्नघ्राणं शीर्णदेहं विसंज्ञम् ।
माता पिता बान्धवाः सन्त्यजन्ति सर्वैस्त्यक्तं पासि कोऽस्ति त्वदन्यः ॥ ७ ॥

*vyādhigrastaṁ kuṣṭharogābhibhūtaṁ bhagnaghrāṇaṁ śīrṇadehaṁ visaṁjñam |*
*mātā pitā bāndhavāḥ santyajanti sarvaistyaktaṁ pāsi ko'sti tvadanyaḥ || 7 ||*

**MEANING**

One gripped by illness, overcome by leprosy, his nose broken, his body wasted, his senses gone: mother, father, and kin all forsake him. When all have forsaken him, you protect him. Who is there but you?

**अर्थ**

जो रोग से ग्रस्त हो, कुष्ठ से पीड़ित हो, जिसकी नाक गल गई हो, देह जर्जर हो और चेतना खो गई हो: माता, पिता और बंधु सब उसे छोड़ देते हैं। सबके द्वारा त्यागे गए उस व्यक्ति की आप रक्षा करते हैं। आपके सिवा और कौन है?

---

त्वं मे पिता त्वं जननी त्वमेव त्वं मे गुरुर्बान्धवाश्च त्वमेव ।
त्वं मे धर्मस्त्वञ्च मे मोक्षमार्गो दासस्तुभ्यं त्यज वा रक्ष देव! ॥ ८ ॥

*tvaṁ me pitā tvaṁ jananī tvameva tvaṁ me gururbāndhavāśca tvameva |*
*tvaṁ me dharmastvañca me mokṣamārgo dāsastubhyaṁ tyaja vā rakṣa deva! || 8 ||*

**MEANING**

You are my father, you my mother, you alone; you are my teacher and my kin, you alone. You are my dharma and my path to liberation. I am your servant: forsake me or protect me, O God.

**अर्थ**

आप ही मेरे पिता हैं, आप ही माता हैं; आप ही मेरे गुरु और बंधु हैं। आप ही मेरा धर्म और मोक्ष का मार्ग हैं। मैं आपका दास हूँ: हे देव, मुझे त्यागें या मेरी रक्षा करें।

---

पापोऽस्मि मूढोऽस्मि महोग्रकर्मा रौद्रोऽस्मि नाऽऽचारनिधानमस्मि ।
तथापि तुभ्यं प्रणिपत्य पादयोर्जयं भक्तानामर्पयं श्रीजयार्क! ॥ ९ ॥

*pāpo'smi mūḍho'smi mahograkarmā raudro'smi nā'cāranidhānamasmi |*
*tathāpi tubhyaṁ praṇipatya pādayorjayaṁ bhaktānāmarpayaṁ śrījayārka! || 9 ||*

**MEANING**

I am sinful, I am deluded, my deeds are harsh; I am fierce, and no storehouse of good conduct. Even so, bowing at your feet, I offer you this plea: victory to your devotees, O glorious Jayarka.

**अर्थ**

मैं पापी हूँ, मूढ़ हूँ, मेरे कर्म कठोर हैं; मैं उग्र हूँ और सदाचार का भंडार नहीं हूँ। फिर भी आपके चरणों में प्रणाम करके यह प्रार्थना अर्पित करता हूँ: हे श्री जयार्क, आपके भक्तों की विजय हो।

---

## फलश्रुतिः

### नारद उवाच

एवं स्तुतो जयादित्यः कमठेन महात्मना ।
स्निग्धगम्भीरयावाचा प्राह तं प्रहसन्निव ॥ १० ॥

*evaṁ stuto jayādityaḥ kamaṭhena mahātmanā |*
*snigdhagambhīrayāvācā prāha taṁ prahasanniva || 10 ||*

**MEANING**

Narada said: Praised in this way by the great-souled Kamatha, Jayaditya, as if smiling, spoke to him in a gentle, deep voice.

**अर्थ**

नारद बोले: महात्मा कमठ द्वारा इस प्रकार स्तुति किए जाने पर जयादित्य ने मानो मुस्कुराते हुए, स्नेहपूर्ण और गम्भीर वाणी में उनसे कहा।

---

जयादित्याष्टकमिदं यत्त्वया परिकीर्तितम् ।
अनेनस्तोष्यते यो माम्भुवि तस्य न दुर्लभम् ॥ ११ ॥

*jayādityāṣṭakamidaṁ yattvayā parikīrtitam |*
*anenastoṣyate yo māmbhuvi tasya na durlabham || 11 ||*

**MEANING**

"For whoever on earth praises me with this Jayaditya Ashtakam that you have sung, nothing will be out of reach.

**अर्थ**

"तुमने जो यह जयादित्याष्टक गाया है, पृथ्वी पर जो इससे मेरी स्तुति करेगा, उसके लिए कुछ भी दुर्लभ नहीं होगा।

---

रविवारे विशेषेण मां समभ्यर्च्य यः पठेत् ।
तस्य रोगानशिष्यन्ति दारिद्र्यञ्च न संशयः ॥ १२ ॥

*ravivāre viśeṣeṇa māṁ samabhyarcya yaḥ paṭhet |*
*tasya rogānaśiṣyanti dāridryañca na saṁśayaḥ || 12 ||*

**MEANING**

Whoever worships me and recites it, especially on a Sunday, his diseases will perish, and his poverty too; of this there is no doubt.

**अर्थ**

जो विशेष रूप से रविवार को मेरी पूजा करके इसका पाठ करेगा, उसके रोग और दरिद्रता नष्ट होंगे, इसमें संदेह नहीं।

---

त्वया च तोषितोवत्सतवदद्मिवरन्त्वमुम्।
सर्वज्ञो भुवि भूत्वा त्वं ततो मुक्तिमवाप्स्यसि॥ १३॥

*tvayā ca toṣitovatsatavadadmivarantvamum |*
*sarvajño bhuvi bhūtvā tvaṁ tato muktimavāpsyasi || 13 ||*

**MEANING**

And you have pleased me, child; I give you this boon: you will become all-knowing on earth, and then attain liberation.

**अर्थ**

वत्स, तुमने मुझे प्रसन्न किया है; मैं तुम्हें यह वर देता हूँ: तुम पृथ्वी पर सर्वज्ञ होकर फिर मोक्ष प्राप्त करोगे।

---

त्वत्पिता स्मृतिकारश्च भविष्यति द्विजार्चितः।
स्थानस्याऽस्य न नाशश्च कदाचित्प्रभविष्यति॥ १४॥

*tvatpitā smṛtikāraśca bhaviṣyati dvijārcitaḥ |*
*sthānasyā'sya na nāśaśca kadācitprabhaviṣyati || 14 ||*

**MEANING**

Your father will become the author of a Smriti, honoured by the twice-born; and this place will never be destroyed.

**अर्थ**

तुम्हारे पिता द्विजों द्वारा पूजित स्मृतिकार होंगे; और इस स्थान का कभी नाश नहीं होगा।

---

न चैतत्स्थानकं वत्स परित्यक्ष्यामि कर्हिचित्।
एवमुक्त्वा स भगवान्ब्राह्मणैरर्चितः स्तुतः॥ १५॥

*na caitatsthānakaṁ vatsa parityakṣyāmi karhicit |*
*evamuktvā sa bhagavānbrāhmaṇairarcitaḥ stutaḥ || 15 ||*

**MEANING**

I shall never leave this holy place, child." Having said this, the Lord, worshipped and praised by the Brahmins,

**अर्थ**

वत्स, मैं इस स्थान को कभी नहीं छोड़ूँगा।" ऐसा कहकर, ब्राह्मणों द्वारा पूजित और स्तुत भगवान,

---

अनुज्ञाप्य द्विजेन्द्रांस्तांस्तत्रैवाऽन्तर्दधे प्रभुः।
एवं पार्थ समुत्पन्नो जयादित्योऽत्र भूतले॥ १६॥

*anujñāpya dvijendrāṁstāṁstatraivā'ntardadhe prabhuḥ |*
*evaṁ pārtha samutpanno jayādityo'tra bhūtale || 16 ||*

**MEANING**

took leave of those foremost Brahmins and vanished there and then. In this way, O Partha, Jayaditya came to be here on earth.

**अर्थ**

उन श्रेष्ठ ब्राह्मणों से विदा लेकर वहीं अंतर्धान हो गए। हे पार्थ, इस प्रकार जयादित्य इस पृथ्वी पर प्रकट हुए।

आश्विने मासि सम्प्राप्ते रविवारे च सुव्रत! ।
आश्विने भानुवारेण यो जयादित्यमर्चयेत् ॥ १७ ॥

*āśvine māsi samprāpte ravivāre ca suvrata! |*
*āśvine bhānuvāreṇa yo jayādityamarcayet || 17 ||*

**MEANING**

When the month of Ashvina comes, O man of good vows, whoever worships Jayaditya on a Sunday in Ashvina,

**अर्थ**

हे सुव्रत, आश्विन मास आने पर, जो आश्विन के रविवार को जयादित्य की पूजा करता है,

---

कोटितीर्थे नरः स्नात्वा ब्रह्महत्यां व्यपोहति ।
पूजनाद्रक्तमाल्यैश्च रक्तचन्दनकुङ्कुमैः ॥ १८ ॥

*koṭitīrthe naraḥ snātvā brahmahatyāṁ vyapohati |*
*pūjanādraktamālyaiśca raktacandanakuṅkumaiḥ || 18 ||*

**MEANING**

having bathed at Koti Tirtha, washes away even the sin of killing a Brahmin. By worship with red garlands, red sandal, and kumkum,

**अर्थ**

वह कोटितीर्थ में स्नान करके ब्रह्महत्या के पाप से भी छूट जाता है। लाल मालाओं, लाल चन्दन और कुंकुम से पूजा करने से,

---

लेपनाद्गन्धधूपाद्यैर्नैवेद्यैर्घृतपायसैः ।
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥ १९ ॥

*lepanādgandhadhūpādyairnaivedyairghṛtapāyasaiḥ |*
*brahmaghnaśca surāpaśca steyī ca gurutalpagaḥ || 19 ||*

**MEANING**

by anointing, with fragrance, incense, and the rest, with food offerings, ghee, and sweet rice, even one who has killed a Brahmin, drunk liquor, stolen, or violated his teacher's bed

**अर्थ**

लेप, गन्ध, धूप आदि से, नैवेद्य, घी और खीर से (पूजा करने पर), ब्रह्महत्यारा, मद्यपान करने वाला, चोर और गुरुपत्नीगामी भी

---

मुच्यते सर्वपापेभ्यः सूर्यलोकञ्च गच्छति ।
पुत्रदारधनान्यायुः प्राप्य सांसारिकं सुखम् ॥ २० ॥

*mucyate sarvapāpebhyaḥ sūryalokañca gacchati |*
*putradāradhanānyāyuḥ prāpya sāṁsārikaṁ sukham || 20 ||*

**MEANING**

is freed from all sins and goes to the world of the Sun. Having gained sons, a wife, wealth, long life, and the happiness of this world,

**अर्थ**

सब पापों से मुक्त होकर सूर्यलोक को जाता है। पुत्र, पत्नी, धन, आयु और सांसारिक सुख पाकर,

---

इष्टकामैः समायुक्तः सूर्यलोके चिरं वसेत् ॥ २१ ॥

*iṣṭakāmaiḥ samāyuktaḥ sūryaloke ciraṁ vaset || 21 ||*

**MEANING**

and with the wishes he holds dear fulfilled, he dwells long in the world of the Sun.

**अर्थ**

और मनचाही कामनाओं से युक्त होकर वह दीर्घकाल तक सूर्यलोक में निवास करता है।

---

सर्वेषु रविवारेषु जयादित्यस्य दर्शनम् ।
कीर्तनं स्मरणं वापि सर्वरोगोपशान्तिकम् ॥ २२ ॥

*sarveṣu ravivāreṣu jayādityasya darśanam |*
*kīrtanaṁ smaraṇaṁ vāpi sarvarogopaśāntikam || 22 ||*

**MEANING**

On every Sunday, seeing Jayaditya, singing of him, or even remembering him brings relief from every disease.

**अर्थ**

हर रविवार को जयादित्य का दर्शन, कीर्तन या स्मरण भी सभी रोगों को शांत करने वाला है।

---

अनादिनिधनं देवमव्यक्तं तेजसान्निधिम् ।
ये भक्तास्ते च लीयन्ते सौरस्थाने निरामये ॥ २३ ॥

*anādinidhanaṁ devamavyaktaṁ tejasānnidhim |*
*ye bhaktāste ca līyante saurasthāne nirāmaye || 23 ||*

**MEANING**

He is the god without beginning or end, unmanifest, a treasure house of light. Those who are devoted to him merge into the Sun's abode, where there is no sickness.

**अर्थ**

वे अनादि और अनन्त देव हैं, अव्यक्त हैं, तेजों के भंडार हैं। जो उनके भक्त हैं, वे रोगरहित सूर्यधाम में लीन हो जाते हैं।

---

सूर्योपरागे सम्प्राप्ते रविकूपे समाहितः ।
स्नानं यः कुरुते पार्थ होमं कुर्यात्प्रयत्नतः ॥ २४ ॥

*sūryoparāge samprāpte ravikūpe samāhitaḥ |*
*snānaṁ yaḥ kurute pārtha homaṁ kuryātprayatnataḥ || 24 ||*

**MEANING**

When a solar eclipse comes, O Partha, whoever bathes with a collected mind in the Ravi Kupa, the Sun's well, and performs a homa with care,

**अर्थ**

हे पार्थ, सूर्यग्रहण के समय जो एकाग्रचित्त होकर रविकूप (सूर्य के कुएँ) में स्नान करता है और यत्नपूर्वक हवन करता है,

---

दानं चैव यथाशक्त्या जयादित्याग्रतःस्थितः ।
तस्य पुण्यस्य माहात्म्यं श‍ृणुष्वैकमनाजय ॥ २५ ॥

*dānaṁ caiva yathāśaktyā jayādityāgrataḥsthitaḥ |*
*tasya puṇyasya māhātmyaṁ śṛṇuṣvaikamanājaya || 25 ||*

**MEANING**

and gives in charity as far as he can, standing before Jayaditya: hear now, O Jaya, with an attentive mind, the greatness of his merit.

**अर्थ**

और जयादित्य के सामने खड़े होकर यथाशक्ति दान करता है: हे जय (अर्जुन), उसके पुण्य की महिमा एकाग्र मन से सुनो।

---

कुरुक्षेत्रेषु यत्पुण्यं प्रभासे पुष्करेषु च ।
वाराणस्याञ्च यत्पुण्यं प्रयागे नैमिषेऽपि वा ।
तत्पुण्यं लभते मर्त्यो जयादित्यप्रसादतः ॥ २६ ॥

*kurukṣetreṣu yatpuṇyaṁ prabhāse puṣkareṣu ca |*
*vārāṇasyāñca yatpuṇyaṁ prayāge naimiṣe'pi vā |*
*tatpuṇyaṁ labhate martyo jayādityaprasādataḥ || 26 ||*

**MEANING**

The merit to be had at Kurukshetra, at Prabhasa, and at the Pushkaras, the merit at Varanasi, at Prayaga, or at Naimisha: that merit a mortal gains by the grace of Jayaditya.

**अर्थ**

कुरुक्षेत्र, प्रभास और पुष्कर में जो पुण्य मिलता है, वाराणसी, प्रयाग या नैमिषारण्य में जो पुण्य मिलता है, वह पुण्य मनुष्य जयादित्य की कृपा से प्राप्त करता है।

---

॥ इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां
प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे
जयादित्यमाहात्म्यवर्णननामैकपञ्चाशत्तमोऽध्याये
जयादित्याष्टकम् ॥

*|| iti śrīskānde mahāpurāṇe ekāśītisāhasryāṁ saṁhitāyāṁ*
*prathame māheśvarakhaṇḍe kaumārikākhaṇḍe*
*jayādityamāhātmyavarṇananāmaikapañcāśattamo'dhyāye*
*jayādityāṣṭakam ||*

**MEANING**

Thus the Jayaditya Ashtakam, in the fifty-first chapter, named "The Glory of Jayaditya", of the Kaumarika Khanda in the first part, the Maheshvara Khanda, of the Shri Skanda Mahapurana, the collection of eighty-one thousand verses.

**अर्थ**

इस प्रकार इक्यासी हजार श्लोकों वाली श्री स्कन्द महापुराण संहिता के प्रथम माहेश्वर खण्ड के कौमारिका खण्ड में "जयादित्य माहात्म्य वर्णन" नामक इक्यावनवें अध्याय में जयादित्याष्टक (पूर्ण हुआ)।

---

## Texts referred to संदर्भ ग्रंथ


1. *Skanda Purana*, Maheshvara Khanda, Kaumarika Khanda, chapter 51, verses 65 to 90; verse 25 of the same chapter names Harita as Kamatha's father.

2. *The Skanda Purana*, translated by G. V. Tagare (Motilal Banarsidass), Part 2, Kaumarika Khanda, chapter 51, “The Greatness of Jayaditya”.

## Not sure which practice suits your chart?

The right hymn, and the right time for it, depends on your own chart and its periods. Ask one focused question and receive a written answer worked out from your birth chart.
आपकी कुंडली के लिए कौन सा पाठ उचित है, यह जानने के लिए अपना एक प्रश्न पूछें।

astroshala.com/product/ask-a-question

Shared for devotion and study. Recitation is traditional practice and carries no promise of a particular result; it is not a substitute for medical, legal, or financial advice. © AstroShala.com

ASTROSHALA

## Notes and recitation record टिप्पणी और पाठ का विवरण

| Date दिनांक | Recitations पाठ संख्या | Notes टिप्पणी |
|---|---|---|
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |

ASTROSHALA